पातञ्जलमहाभाष्यं पुरस्कृत्य आद्यन्तवद्भावविचारः

Midhun P.
Guest Lecturer, Dept. of Vyakarana, SSUS RC Tirur.

Submitted on: 27/08/2019 Revised on: 04/09/2019 Accepted on: 11/09/2019

वार्तिकसहितानां पाणिनीयसूत्राणां विस्तृतं व्याख्यानं विरचितं भगवता पतञ्जलिना । अस्य व्याकरणभाष्यस्य विषयवैपुल्येन सुबद्धतया च महाभाष्यशब्दः कालेन रूढोऽभवत् । शास्त्रान्तरेषु दर्शनेषु च भाष्यस्योपरि वार्तिकमस्ति । अत्र तु वार्तिकोपरि विचारणार्थं भाष्यम् । अत उक्तम्- 'महत्त्वमस्य भाष्यस्य वार्तिकोपरि चिन्तनात्' इति । अस्य च भाष्यस्य ललिता गम्भीरा च या शैली सा भाष्यान्तरेषु द्रष्टुं नैव शक्यते । एवं, विविधान् लौकिकन्यायानुद्धृत्य लोकव्यवहारान् च दर्शयित्वा स्वाशयप्रतिपादनं पातञ्जलस्यास्य महत्त्वं विशेषता च ।

तत्र महाभाष्ये, 'आद्यन्तवदेकस्मिन्' (१.१.२१) इति सूत्रव्याख्यानावसरे आद्यन्तवद्भावः इति व्यावहारिकप्रयोगो विशदीकृतः आचार्येण । पूर्वस्य परस्य चाभावेऽपि एकस्मिन्नेव असहाये कार्यसिद्ध्यर्थमयम् आद्यन्तवद्भावः आश्रीयते । शास्त्रे लोके चास्य प्रभावो वर्तते । पातञ्जलमहाभाष्यमनुसृत्य अस्याऽऽद्यन्तवद्भावस्य व्याकरणशास्त्रे लौकिकव्यवहारे च कथं प्रवृत्तिः, कानि च तस्य प्रयोजनानि इत्येतस्मिन् विचारः क्रियतेऽस्मिन् पत्रे ।

सूत्रावलोकनम्

महर्षिपाणिनिप्रणीतायामष्टाध्याय्यां प्रथमाध्याये प्रथमपादे एकविंशतितमं सूत्रमिदम् । आद्यन्तवद् एकस्मिन् इति द्विपदं सूत्रम् । यस्मात् पूर्वं नास्ति परमस्ति स आदिः , यस्माद् पूर्वमस्ति परं नास्ति स अन्तः । आदिश्च अन्तश्च आद्यन्तौ । आद्यन्तयोः इव आद्यन्तवत् । एकस्मिन् इति उपमेये सप्तमीश्रवणात् उपमानस्यापि सप्तमीसामर्थ्यम् । सप्तम्यन्तात् आद्यन्तशब्दात् ' तत्र तस्येव' (५.१.११६) इति सूत्रेण इवार्थे वतिप्रत्ययः । आद्यन्त ओस् वति इत्यवस्थायाम् अनुबन्धलोपे 'आद्यन्त ओस् वत्' इति जाते तद्धितान्तत्वात् 'कृत्तद्धितसमासाश्च' (१.२.४६) इत्यनेन प्रातिपदिकत्वात् 'सुपो धातुप्रातिपदिकयोः' (२.४.७१) इत्यनेन सुब्लुकि आद्यन्तवत् इति जाते 'तद्धितश्चासर्वविभक्तिः' (१.१.३८) इत्यनेन अव्ययत्वे प्रातिपदिकत्वात् सुप्रत्यये 'अव्ययादाप्सुपः' (२.४.८२) इत्यनेन सुप्रत्ययलोपे आद्यन्तवत् इति सिद्ध्यति । 'द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते' इति न्यायेन वतिप्रत्ययः प्रत्येकं सम्बध्यते । आदौ इव अन्ते इव इति लभ्यते । एकशब्दः असहायवाची, न तु सङ्ख्यावाची । "वृन्दारकौ रूपिमुख्यावेके मुख्यान्यकेवलाः" इति कोशानुरोधात्

। एवं च सिद्धान्तकौमुद्याम्, एकस्मिन् क्रियमाणं कार्यम् आदौ इव अन्ते इव च स्यात् इति सूत्रवृत्तिः । तदादि-तदन्तयोः क्रियमाणं कार्यम् एकस्मिन् असहायेऽपि तदादौ इव तदन्ते इव च स्यात् इत्यर्थः ।

सूत्रारम्भे स्वारस्यप्रदर्शनम्

भाष्ये किमर्थमिदं सूत्रमारब्धम् इति विचार्यते । लोके परस्मिन् सहाये पूर्वाभावे सति आदिरिति व्यपदिशति । पूर्वस्मिन् सहाये पराभावे सति अन्तः इति च । तदुभयमेकस्मिन्नसहाये नास्ति-यत्र सहायत्वं नास्ति तत्र आद्यन्तप्रतिबद्धानि कार्याणि न स्युः , किन्तु इष्यन्ते च । तानि च कार्याणि यत्नं विना न सिद्ध्यन्ति इत्येतस्मात्सूत्रमिदमुच्यते- 'आद्यन्तवदेकस्मिन्नि'ति ।

अत्र यद्यपि 'सत्यन्यस्मिन्नाद्यन्तवद्भावाद् एकस्मिन्नाद्यन्तवद्वचनम्' (म.भा.१,पु.७७) इति वार्तिकेन सूत्रस्यास्य प्रयोजनवत्ता स्पष्टीकृता वर्तते, तथापि वार्तिककारः सूत्रमिदं खण्डयति । अस्य अयमाशयः – सूत्रमिदमावश्यकमेव, किन्तु इतोऽपि किञ्चिदधिकं प्रयोजनं साध्यं, यतः अनेन केवलमाद्यन्तसंबन्धिकार्याणां विषये एव अतिदेशकरणं शक्यम् । अभीष्टं तु इतोऽप्यधिकेषु विषयेषु अस्य व्याप्तिर्भवेदिति । तस्मिंश्चासमर्थोऽयं योगः । अत उच्यते वार्तिककारेण- 'तत्र व्यपदेशिवद्वचनं कर्तव्यम्' इति । अनेन च न केवलमाद्यन्तविषयेषु किन्तु अनेकेष्वप्यन्येषु विषयेषु अतिदेशस्य व्याप्तिर्भवति ।

व्यपदेशिवद्वचनम् इति वार्तिककारमतम्

भाष्यकारेण सहाये असहाये च आद्यन्तप्रतिबद्धानि कार्याणि स्युः इत्येदतर्थं व्यपदेशिवद्वचनं कर्तव्यमित्युच्यते- 'तत्र व्यपदेशिवद्वचनम्' इति । कथम् इति चेत्, तत्र, व्यपदेशः नाम विशिष्टः अपदेशः । मुख्यो व्यवहारः इत्यर्थः । व्यपदेशिनि तुल्यं व्यपदेशिवत् । यथा मुख्यव्यवहारे आदिः अन्तः इति प्रयुज्यते तथैव असहाये अपि इत्यर्थः । किं तस्य प्रयोजनमिति विचार्यते तदनन्तरम् – 'किं तस्य प्रयोजनम्?' इति । तदा उच्यते 'एकचो द्वे प्रथमस्य' (६.१.१.) इत्यत्र एकः अच् यस्मिन् सः एकाच् इति बहुव्रीहिनिर्देशे , तस्मिन् क्रियमाणे , पपाच- पपाठ इत्यादौ दोषः नास्ति । किन्तु इयाय आर इत्यत्र दोषः जायेत । तत्र रूपसिद्ध्यर्थं इदं व्यपदेशिवद्वचनं कर्तव्यम् ।

इयाय इत्यत्र 'इण् गतौ' इत्यस्माद्धातोः 'परोक्षे लिट्'(३.२.११५) इति लिटि, तिबादेशे 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' (३.४.८२) इति णलि अनुबन्धलोपे 'इ अ' इति जाते 'एकाचो द्वे प्रथमस्य'(६.१.१) इत्यधिकारे 'लिटि धातोरनभ्यासस्य' (६.१.८) इति द्वित्वे 'इ इ अ' इति भवति । तत्र दोषः उच्यते 'एकाचो द्वे प्रथमस्य' इति सूत्रस्थस्य एकाच् इत्यस्य विग्रहे बहुव्रीहिसमासकरणे एकः अच् यस्मिन् समुदाये सः इति लभ्यते । अत्र तु एक एव अच् इत्यतः एकाच् भवितुं नार्हति, एवं द्वित्वमपि न भवेत् । अत्र दोषनिवारणार्थं सूत्रमिदमावश्यकम् । अनेन सूत्रेण असहायकस्य इकारस्य व्यपदेशिवदेकस्मिन् कार्यम् भवतीत्यनेन द्वित्वे 'इ इ अ' इति जाते 'अभ्यासस्यासवर्णे'(६.४.७८) इति इयङादेशे 'इय् इ अ' इति जाते 'अचो ञ्णिति'(७.२.११५) इति वृद्धौ 'इय् ऐ अ' इति जाते अयादेशे च इयाय इति रूपम् । एवम् आर इति 'ऋ गतिप्रापणयोः' इति धातोः लिटि रूपम् ।

व्यपदेशिवद्वचनस्य अपरं प्रयोजनमुच्यते – 'षत्वं चाऽदेशसंप्रत्ययार्थम्' इति। इन्द्रो मा वक्षत् इत्यत्र 'वच परिभाषणे' इति धातोः लेटि तिप्रत्यये 'इतश्च लोपः परस्मैपदेषु' (३.४.९७) इत्यनेन तकारोत्तरेकारलोपे वच् त् इति जाते 'लेटोऽडाडौ' (३.४.९४) इत्यनेन अडागमे वच् अत् इति जाते 'सिब्बहुलं लेटि' (३.१.३४) इत्यनेन सिबागमे अनुबन्धलोपे वच् सत् इति जाते 'चोः कुः' इत्यनेन चकारस्य कुत्वे वक् सत् इति जाते इदानीम् 'आदेशप्रत्यययोः' (८.३.५९) इत्यनेन षत्वे कर्तव्ये इण् कवर्गाभ्यां परस्य प्रत्ययावयवस्य मूर्धन्यः स्यात् इति विधीयते। प्रकृते सकारः एकाल्प्रत्यय एव, न तु प्रत्ययावयवः। अत्र रूपसिद्ध्यर्थं व्यपदेशिवद्वचनम् आवश्यकम्।

लौकिकव्यवहारेषु व्यपदेशिवद्भावः

अनन्तरमुच्यते भाष्यकारेण- 'व्यपदेशिवद्भवो न वक्तव्यः' इति। सूत्रेऽनुक्तेऽपि लोकविज्ञानात् सिद्धमिति। उदाहरणानि कथयत्याचार्यः – लोके बहूनां गृहाणां समुदायो ग्राम इत्युच्यते। किन्तु एकं गृहमस्ति चेदपि एकशालो ग्रामः इत्युच्यते। तादृशलोकव्यवहारात् पूर्वोक्तदोषाः न स्यादित्यतः व्यपदेशिवद्वचनं नावश्यकम्। ग्रामशब्दः बह्वर्थकः इत्यतः एषा प्रतिज्ञा निराक्रियते। शालासमुदायार्थे ग्रामशब्दः वर्तते यथा शालासमुदायो दग्धः इत्यर्थे ग्रामो दग्धः इति प्रयोगः। एवं वाटपरिक्षेपार्थे ग्रामं प्रविष्ट इति प्रयोगः। वाटपरिक्षेपो नाम शालासमुदायरक्षणार्थं सर्वतः मार्गप्रतिरोधकं यत् क्षिप्यते तत्। तत् प्रतिरोधमतिलङ्घ्य तं शालासमुदायं प्रविष्टः इत्यर्थः। पुनः ग्रामशब्दः मनुष्येषु वर्तते। ग्रामो गतो ग्राम आगत इति। अत्र ग्रामशब्देन ग्रामनिवासिनां ग्रहणम्। पुनः सारण्यके ससमीपके सस्थण्डिलके वर्तते यथा ग्रामो लब्ध इति। अरण्यसीमादीनां समुदायो लब्ध इत्यर्थः। तमभिसमीक्ष्य एतत् प्रयुज्यते एकशालो ग्राम इति।

लोकविज्ञानात् सिद्धम् इति साधयितुं सिद्धान्तिनो दृष्टान्तभाष्यमुच्यते – यथा बहुषु पुत्रेषु विद्यमानेषु वक्तुं शक्यते अयं मे ज्येष्ठः, अयं मे मध्यमः, अयं मे कनीयान् इति तथा एकस्मिन्नपि पुत्रे विद्यमाने वक्तुं शक्यते – अयमेव मे ज्येष्ठः, अयमेव मध्यमः, अयमेव कनीयान् इति। पुनः उच्यते तथा- असूतायामसोष्यमाणायां च भवति प्रथमगर्भेण हता इति व्यपदेशः। अत्र अपत्यपर्यायः गर्भशब्दः। तथा अनेत्य अनाजिगमिषुराह इदं मे प्रथमागमनमिति। आजिगमिषुः भाविन्यागमनानि बुद्ध्या व्यवस्थाप्य कुर्यादेव अत्र प्रथमव्यवहारम्।

सूत्रप्रत्याख्यानम्

वचननिरपेक्षत्वात् लोकव्यवहारादेव व्यपदेशिवद्भावसिद्धेः आद्यन्तवदिति व्यपदेशिवदिति चोभयमपि न सूत्रयितव्यमित्यतः सूत्रमिदं प्रत्याख्यायते आचार्येण- 'अपूर्वानुत्तरलक्षणत्वात् आद्यन्तयोः सिद्धमेकस्मिन्' इति वार्तिकेन। अपूर्वलक्षणः आदिः, अनुत्तरलक्षणः अन्तः। एतल्लक्षणद्वयमपि एकस्मिन्नपि भवति। पूर्वं नास्तीत्यतः स आदिः, परं नास्तीत्यतः स अन्तोऽपि। अतः असहाये अपि आद्यन्तापदिष्टानि कार्याणि भविष्यन्तीत्यतः सूत्रमिदं त्यक्तुं शक्यम् इति।

पुनः किमर्थमिदं सूत्रमारब्धं इति सन्देहे समाधानमुच्यते- यद्यपि लौकिकेन व्यपदेशिवद्भावेन

आद्यन्तवद्व्यपदेशः असहायेऽपि सिद्ध्यति तथापि 'गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः' (परि.१५) इति परिभाषया व्यपदेशिवद्भावस्य गौणत्वे यस्य भ्रान्तिः स्यात् तं प्रति सूत्रमिदमारब्धम् – 'आद्यन्तवदेकस्मिन्नि'ति।

सूत्रप्रयोजनानि

तदनन्तरं योगस्यास्य प्रयोजनान्युच्यन्ते – प्रथमं वलादेरार्धधातुकस्येट् इति।

'जुष परितर्कणे' इति धातोः 'लिङर्थे लेट्' (३.४.७) इति लेटि 'सिब्बहुलं लेटि' (३.१.३४) इति सिपि 'लेटोऽडाटौ' (३.४.९४) इति अडागमे 'इतश्च लोपः परस्मैपदेषु' (३.४.९७) इत्यनेन इकारलोपे 'जुष् स् अत्' इति जाते 'आर्धधातुकस्येड्वलादेः' (७.२.३५) इत्यनेन इडागमे 'पुगन्तलघूपधस्य च' (७.३.८६) इति उपधागुणेसकारस्य 'आदेशप्रत्यययोः' (८.३.५९) इत्यनेनषत्वेजोषिषत्इतिरूपम्।"'आर्धधातुकस्येड्वलादेः' इत्यनेन वलादेः आर्धधातुकस्य इडागमः उच्यते। अत्र सकारः वल् एव न तु वलादिः। तत्रादित्वव्यवहारासम्भवात् अनिष्टरूपापत्तिः। तन्निवारणार्थमिदं सूत्रमावश्यकम्।

पुनः प्रयोजनान्तरमुच्यते – अजाद्यात्वे इति।

'इङ् अध्ययने' इति धातोः लुङि ङित्वादात्मनेपदम् अतः प्रथमपुरुषैकवचनविवक्षायां तप्रत्यये 'इ त' इति जाते 'आडजादीनाम्' (६.४.७२) इति आडागमे 'आटश्च' (६.१.९०) इति वृद्धौ ऐ त इति जाते 'च्लि लुङि' (३.१.४३) इति च्लिप्रत्यये 'च्लेः सिच्'(३.१.४४) इति सिजादेशे ऐ स् त इति जाते आदेशप्रत्यययोः इति सस्य षत्वे ष्टुत्वे च ऐष्ट इति रूपम्। आड्विधाने अजादित्वं निमित्तं अत्र इ इति अच् एव न अजादिः। अतः आडागमार्थं आद्यन्तवद्भावो वक्तव्यः। तदर्थमिदं सूत्रम्।

अनन्तरम् अन्तवत्वे प्रयोजनमुच्यते 'मिदऽचोन्त्यात्परः' इति।

तच्छब्दात् नपुंसकलिङ्गे बहुवचने जस्प्रत्यये तत् जस् इति जाते 'जश्शसोः शिः' (७.१.२०) शिभावे तत् इ इति जाते 'त्यदादीनामः' (७.२.१०२) इति अकारेऽन्तादेशे 'त अ इ' इति जाते 'अतो गुणे' इति पररूपे 'त इ' इति जाते 'नपुंसकस्य झलचः' (७.१.७२) इति नुमागमे 'सर्वनामस्थाने चासम्बुद्धौ' (६.४.८) इति उपधादीर्घे तानि इति रूपम्। 'नपुंसकस्य झलचः' इत्यत्र अजन्तस्य इत्युक्तम्। इ इति अजेव न अजन्तम्। अत्रापि इष्टरूपसिद्ध्यर्थम् आद्यन्तवद्भावो वक्तव्यः। इत्येवमाद्यन्तवत्सूत्रप्रयोजनानि व्यवस्थापितानि।

शास्त्रे लोके च आद्यन्तवद्भावम् - अन्ततो गत्वा व्यपदेशिवद्भावं च - प्रतिपादयन्नाचार्यः शास्त्रस्य इव लौकिकव्यवहारस्यापि परमं प्राधान्यं जानन् व्यवहारतुलनया उदाहरणानि प्रत्युदाहरणानि च प्रदर्शयति। अत्र आद्यन्तवद्भावस्य शास्त्रे प्रवृत्तिं प्रयोजनानि च विशदीकृत्य सूत्रप्रत्याख्यानसाधनार्थमनेकानि लौकिकोदाहरणानि च प्रदर्शितान्याचार्येण। एवं चेदमपि ज्ञायते यत्, 'महाभाष्यं वा पठनीयं महाराज्यं वा पालनीयम्' इति भाष्यपठने या कठिनता उक्ता वर्तते, तादृशकठिनतायां सत्यामपि एतादृशलौकिकोदाहरणैः तत्र तत्र सरलतामानेतुं बद्धश्रद्धः आसीत् नानाशास्त्रपारङ्गतोऽयमाचार्यः पतञ्जलिः इति।

सहायकग्रन्थाः

१. अष्टाध्यायी, पाणिनिः, संपा- डॉ. अभिमन्युः, प्रतिभा प्रकाशन, दिल्ली, २०११.

२. काशिकावृत्तिः, जयादित्यवामनौ, संपा- डॉ. जयशङ्कर-लाल्-त्रिपाठी, तारा बुक् एजेंसी, वाराणसी, १९९०.

३. परिभाषेन्दुशेखरः, नागेशभट्टः, प्रो.श्रीपादसत्यनारायणमूर्तिः, राष्ट्रीयसंस्कृतविद्यापीठम्, तिरुप्पती, २००४.

४. वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा-तत्त्वबोधिनीसहिता), भट्टोजिदीक्षितः, गोपालदत्तपाण्डे, चौखंभा अमरभारती प्रकाशन्, वाराणसी, १९९६.

५. व्याकरणमहाभाष्यम् (नवाह्निकम्), पतञ्जलिः, चौखंभा प्रकाशन, वाराणसी, २०१०.

६. शब्दकल्पद्रुमः, राधाकान्तदेव-बहादूर, राष्ट्रीय संस्कृत संस्थान, नई दिल्ली, २००६.